संवत्सरं क्रियाहानिर्यस्य पुंसोऽभिजायते ।
तस्यावलोकनात् सूर्य्यो निरीक्ष्यः साधुभिः सदा॥
स्पृष्टे स्नानं सचेलस्य शुद्धिहेतुर्म्महामुने ! ।
पुंसो भवति तस्योक्ता न शुद्धिः पापकर्म्मणः ॥”
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥ * ॥
सूतादौ नित्यकर्म्मकरणनिषेधो यथा,—
“जातर्द्धे सुतजे जाते नित्यकर्म्म न चाचरेत् ।
नैमित्तिकञ्च तदधःस्रवदक्तो न चाचरेत् ॥
सूतके च समुत्पन्ने क्षुरकर्म्मणि मैथुने ।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत् ॥
द्वये भुक्ते त्वजीर्णे च नैव भुक्ता च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम् ।
कणादिपिप्पल्यन्तञ्च फलं भुक्ता न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ ! भोजनाद्भेषजादृते ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा ॥
जलौकां गूढ़पादञ्च कृमिगण्डूपदादिकम् ।
कामाद्भ्रमेन संस्पृश्य नित्यकर्म्माणि संत्यजेत् ॥
विशेषतः शिवापूर्णां प्रमीतपितृको द्विजः ।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत् ॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं देवयुतञ्च यत् ॥
गुरुमाक्षिप्य विप्रञ्च प्रहृत्यैव च पाणिना ।
न कुर्य्यान्नित्यकर्म्माणि रेतःपाते च भैरव ! ॥”
इति कालिकापुराणे ५४ अध्यायः ॥

नित्यचौरं, क्ली, (नित्यं कालाकालाभावतो रागप्राप्तत्वात् सदातनं चौरम् ।) वैधेतरचौरम् । रागप्राप्तकेशच्छेदनम् । यथा.—
“चूड़ोदिते तिथावृक्षे बुधेन्दोर्द्दिवसे नरः ।
नित्यचौरं प्रकुर्व्वीत जन्मभासे न तु क्वचित् ॥”
इति ज्योतिःसागरसारः ॥ * ॥
राजमार्त्तण्डे तु ।
“न स्नानमात्रगमनोत्सुकभूषितानामभ्यक्तभुक्तरणकालनिवासनानाम् ।
सन्ध्या निशाशनिकुजार्कदिनेषु रिक्ते
चौरं हितं प्रतिपदह्नि न चापि विष्टाम् ॥”
इति ज्योतिस्तत्त्वम् ॥ * ॥
तत्र मासाः सौराः भाद्रपौषचैत्रा निषिद्धाः जन्ममासोऽपि निषिद्धः तदितरे विहिताः । वारस्तु बुधसोमयोर्व्विहितः । सामगानां मङ्गलवारोऽपि । तिथयस्तु नन्दारिक्तापूर्णिमामावास्याष्टमीभिन्ना विहिताः । नक्षत्राणि रेवत्यश्विनी पुष्यः धनिष्ठा ज्येष्ठा श्रवणा स्वाती हस्ता मृगशिरः शतभिषा पुनर्व्वसुः चित्रा । राजादेशे द्विजादेशे विवाहे मृतसूतकाशौचे बन्धमोक्षे यज्ञकर्म्मणि परीक्षायां निषिद्धमासादिष्वपि कार्य्यम् । अशक्तश्चेन्निषिद्धेऽपि दिने ।
“केशवमानतपुरं पाटलिपुत्रं पुरीमहीच्छत्राम् ।
दितिमदितिञ्च स्मरतां चौरविधौ भवति कल्याणम् ॥”
इत्युच्चार्य्य कार्य्यम् । इति ज्योतिषम् ॥

नित्यगतिः, पुं, (नित्यं गतिरस्येति ।) वायुः । इति हेमचन्द्रः । ४ । १७२ ॥ (यथा, महाभारते । ७ । ४५ । २२ ।
“यथा वायुर्नित्यगतिर्जलदान् शतशोऽम्बरे ॥”)

नित्यदा, व्य, (नित्य + दाच् ।) सर्व्वदा । यथा,—
“पुण्यं मधुवनं तत्र सान्निध्यं नित्यदा हरेः ॥”
इति श्रीभागवते ४ स्कन्धः ॥

नित्यदानं, क्ली, (नित्यं दैनन्दिनं दानम् ।) प्रतिदिनकर्त्तव्यदानम् । यथा, गरुड़पुराणे ।
“नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ।
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ॥
अनुद्दिश्य फलं तत् स्याद्ब्राह्मणाय तु नित्यकम् ॥”

नित्यप्रलयः, पुं, (नित्यः प्रलयः ।) चतुर्व्विधप्रलयान्तर्गतप्रलयविशेषः । यथा,—
“नित्यः सदैव जातानां यो विनाशो दिवानिशम् ॥”
इति विष्णुपुराणे १ अंशे ७ अध्यायः ॥
“सदैव दीपज्वालावत् सातत्येन जातानां दिवानिशं यो विनाशः स नित्यः ॥” इति तट्टीकायां स्वामी ॥

नित्ययौवना, स्त्री, (नित्यं स्थिरं यौवनं यस्याः ।) द्रौपदी । इति हेमचन्द्रः । ३ । ३७४ ॥ (नित्यं यौवनं यस्येति ।) स्थिरयौवने, त्रि ॥

नित्यवैकुण्ठः, पुं, (नित्यः सनातनो वैकुण्ठः ।) विष्णोः स्थानविशेषः । यथा,—
“ऊर्द्ध्वं नभसि संविष्टो नित्यवैकुण्ठ एव च ।
आत्माकाशसमो नित्यो विस्तृतश्चन्द्रबिम्बवत् ॥
ईश्वरेच्छासमुद्भूतो निर्लक्ष्यश्च निराश्रयः ।
आकाशवत् सुविस्तारश्चामूल्यरत्ननिर्म्मितः ॥
तत्र नारायणः श्रीमान् वनमाली चतुर्भुजः ।
लक्ष्मीसरस्वतीगङ्गातुलसीपतिरीश्वरः ॥
सुनन्दनन्दकुमुदपार्षदादिभिरन्वितः ।
सर्व्वेशः सर्व्वसिद्धेशो भक्तानुग्रहकारकः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायः ॥

नित्या, स्त्री, (नित्य + टाप् ।) पार्व्वती (यथा, मार्कण्डेये । ८५ । ८ ।
“रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ॥”)
मनसा देवी । इति शब्दरत्नावली ॥ शक्तिविशेषः । अस्या मन्त्रो यथा,—
“वाग्भवं कामबीजञ्च नित्यक्लिन्ने मदौ पुनः ।
द्रवे वह्निवधूर्म्मन्त्रो द्वादशार्णोऽयमीरितः ॥”
ध्यानं यथा,—
“अर्द्धेन्दुमौलिमरुणाममराभिवन्द्यामम्भोजपाशसृणिपूर्णकपालहस्ताम् ।
रक्ताङ्गरागरसनाभरणां त्रिनेत्रां
ध्यायेच्छिवस्य वनितां मदविह्वलाङ्गीम् ॥”
इति तन्त्रसारः ॥
(तन्त्रविशेषः । यथा, महालिङ्गसारस्तवे ।
“गणेशविवर्षिणीतन्त्रं नित्यातन्त्रं शिवागमम् ॥”)

नित्यानध्यायः, पुं, (नित्यं सर्व्वथा यथा तथा अनध्यायः अध्ययनाभावः ।) सर्व्वथा वर्ज्जनीयवेदपाठकालादिः । यथा,—
“इमान्नित्यमनध्यायानधीयानो विवर्ज्जयेत् ।
अध्यापनञ्च कुर्व्वाणः शिष्याणां विधिपूर्व्वकम् ॥
कर्णस्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥
विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥
एतांस्त्वभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥
निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्ज्जने ।
एतानाकालिकान् विद्यादनध्यायानृतावपि ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्ज्जने ।
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् ॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
शयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥
नीहारे वाणशब्दे च सन्ध्ययोरेव चोभयोः ।
अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टकासु च ॥
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी ।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्ज्जयेत् ॥
पांशुवर्षे दिशां दाहे गोमायुविरुते तथा ।
श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥
नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥
प्राणि वा यदि वाप्राणि यत् किञ्चित् श्राद्धिकं भवेत् ।
तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः ॥
चौरैरुपप्लुते ग्रामे सम्भ्रमे चाग्निकारिते ।
आकालिकमनध्यायं विद्यात् सर्व्वाद्भुतेषु च ॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥
नाधीयीताश्वमारूढ़ो न वृक्षं न च हस्तिनम् ।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥
न विवादे न कलहे न सेनायां न सङ्गरे ।
न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके ॥
अतिथिञ्चाननुज्ञाप्य मारुते वाति वा भृशम् ।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ॥
सामध्वनावृग्यजुषी नाधीयीत कदाचन ।
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च ॥
ऋग्वेदो देवदैवत्यो यजुर्व्वेदस्तु मानुषः ।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥
एतद्विद्वन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम् ।
क्रमतः पूर्व्वमभ्यस्य पश्चाद्वेदमधीयते ॥